नं० ८१७-घ

मोहमुद्गरः

नं० ८१७-घ १ पत्र
पत्राम् १एकम्

नं० ८९६-च
मोहमुद्गर: (अपूर्ण:)
पत्रम् १(एकम्)

मोह मूढ जहीहि धनागमतृष्णां कुरु तनुबुद्धिमनःसुवितृष्णां । यल्लभसे निजकर्मोपात्तं
मुद्ग चित्तंतेन विनोदयचित्तं चित्तंतेनविनोदयचित्तं १ अर्थमनर्थंभावयनित्यं नास्ति ततः
रः सुखलेशः सत्यं । पुत्रादपि धनभाजांभीतिः सर्वत्रैषाकथितानीतिः ॥२॥ कातव कान्ता
कस्तेपुत्रः संसारोऽयमतीवविचित्रः । कस्यत्वंवाकुतआयातः तत्त्वंचिन्तयतदिदंभ्रातः ॥३॥
माकुरु धनजनयौवनगर्वं हरतिनिमेषात्कालःसर्वं । मायामयमिदमखिलंहित्वा ब्रह्म
पदं प्रविशाशुविदित्वा ४ नलिनीदलगतजलमतितरलं तद्वज्जीवनमतिशयचपलं ।
विद्धि व्याधिव्यालग्रस्तं लोकंशोकहतंचसमस्तं ५ तत्त्वंचिन्तय सततंचित्ते । परिहर चिन्तां
नश्वरवित्ते । क्षणमिहसज्जनसंगतिरेका भवतिभवार्णवतरणेनौका ६ अष्टकुलाचलसप्त
समुद्रा ब्रह्मपुरंदरदिनकररुद्राः । नत्वं नाहंनायंलोकः तदपिकिमर्थंक्रियतेशोकः ७॥
यावद्वित्तोपार्जनशक्तः तावन्निजपरिवारोरक्तः । तदनुचजरयाजर्जरदेहे वार्तांकोऽपिन
पृच्छतिगेहे ॥८॥ कामंक्रोधंलोभंमोहं त्यक्त्वात्मानंपश्यतिकोऽहं । आत्मज्ञानविहीनामूढाः ॥९॥

सुरमंदिरतरुमूलनिवासः शय्याभूतलमजिनंवासः। सर्वपरिग्रहभोगत्यागः कस्य
सुखं नकरोतिविरागः १० बालस्तावत्क्रीडासक्तः तरुणस्तावत्तरुणीरक्तः वृद्ध
स्तावच्चिंतामग्नः परमेब्रह्मणिकोपिनलग्नः ११ शत्रौमित्रे पुत्रेबंधौ। भवसमचित्तःसर्वत्र
त्वं वांछस्यचिराद्यदिविष्णुत्वं १२ यावज्जननं तावन्मरणं तावज्जननीजठरेशयनं।
इतिसंसारेस्फुटतरदोषः कथमिहमानवतवसंतोषः १३ दिनयामिन्यौसायंप्रातः
शिशिरवसंतौपुनरायातः। कालःक्रीडतिगच्छत्यायुः तदपिनमुंचत्याशावायुः ॥१४॥
अंगंगलितं पलितंमुंडं दंतविहीनंयातंतुंडं। करधृतकंपितशोभितदंडं तदपिनमुंच
त्याशाभाण्डं १५ त्वयिमयिचान्यत्रैकोविष्णुः व्यर्थंकुप्यसि मय्यसहिष्णुः। सर्व पश्या
त्मन्यात्मानं सर्वत्रोत्सृजभेदज्ञानं १६ षोडशपज्झटिकाभिरशेषः
शिष्याणांकथितोभ्युपदेशः। येषांनैषकरोतिविवेकं तेषांकःकुरु
तामतिरेकं ॥१७॥ इति श्रीशंकराचार्यविरचितोमोहमुद्गरः
समाप्तः